# THE

# Swarajyasarvaswa

OF

## Sree-Neelakanta Theertha

---

EDITED BY

Pandit B. Ramakrishna Sastriar

AND PUBLISHED BY

MUNTORKARA RAMAN NAMPURI

Palghat:

PRINTED BY KAMPRAM BROTHERS

1908.

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

# समर्पणम्.

बालाह्वयस्वामिपाद-
पादपङ्केरुहद्वये।
इदमात्मप्रसादाय
प्रसाधकसमर्पणम्॥

इति सि. शङ्करार्भः।

CHATTAMPI SWAMI ARCHIVE

# शुद्धपत्रम् ॥

| पृष्ठसंख्या | पद्यसंख्या | अशुद्धपाठः | शुद्धपाठः |
|---|---|---|---|
| २ | ८ | 'स्वासारा' | 'स्वारा' |
| ४ | २४ | 'नै'व | 'ध्रै'व |
| ५ | ३६ | प्र'दा'रय | प्र'ता'रय |
| ,, | ३९ | 'मेकस्तु' | मेक'त'स्तु |
| ६ | ५० | प्रति'ष्ठ्वि'तं | प्रति'ष्ठि'तं |
| ७ | ५२ | सांत्रेत्य'ण' | सात्रेत्य'ण्' |
| ८ | ६७ | स्तद्व'द' | स्तद्व'द्' |
| २० | १२ | पत्स्पृ'ष्टीत्र' | पत्स्पृ'ष्टिव' |
| ,, | (नोट्) | इक्षुच्छा'या' | इक्षुच्छा'यं' |
| २४ | २ | वि'श्र'मा | वि'भ्र'मा |

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

# स्वाराज्यसर्वस्वम्.

---

## अथ श्रीचित्सुधार्याशती

---

हरिः । ॐ ॥

यस्याज्ञानाज्जगतो भानं स्वप्नेन्द्रजालवत्[1]स्वचिति । य-
ज्ज्ञानाच्चद्विलयस्तं कृष्णं सच्चिदद्वयं वन्दे ॥ १ जनुषामुत्त-
ममाप्तः कोऽहं कः स्यां किमेतदित्येवम् । नैव विविच्यासकलं
पश्येद्[2]बंभ्रम्यमाणहृदयतया ॥ २ योऽयं धातुक उदितः स्व-
स्यैवेतः परं नु शोच्यं किम् । तस्मान्नर इह जातो वैराग्यं सं-
श्रयेत्परं सुखदम् ॥ ३ आवैरिञ्चं भोगं क्षुद्रं मत्वा [3]तृणाय
यस्त्यजति । वैराग्यस्य तु परमां काष्ठां प्राप्तोऽयमुच्यते
सद्भिः ॥ ४ कोऽपि न चरितार्थः स्याद्भोगेनाग्निर्न यत्समि-
त्तृप्तः । मत्वाऽऽगन्तुकमखिलं त्यक्त्वा भूयो न चालयेच्चि-

---

१. 'च्चिति स्वे' पाठ. २. अतिशयेन भ्राम्यमाण. ३. तृणी-
कृत्य.

CHATTAMPI SWAMI ARCHIVE

तम् ॥ ५ जातं जातं विषयं [१]स्वादुतरं सदा समास्वाद्य ।
तृप्तिं नेयान्मनुजो हा [२]मण्डूकायते रिपुग्रस्तः ॥ ६ नर इह
नृवरत्वं सोऽप्येकच्छत्राधिपत्यमिच्छेत्सः । गान्धर्वे पद[३]मस्य
च देवत्वाकाङ्क्षया मनश्चलितम् ॥ ७ स्याद्देवानामैन्द्रं पद-
मस्त्वित्यन्वहं परो मोहः । इन्द्रोपीच्छति नितरां [४]स्वाराज्यं
सोऽपि [५]वैष्णवं द्रुहिणः ॥ ८ [६]नैवैतेषां निर्वृतिरानन्दाधि-
क्यवाञ्छया सततम् । [७]शतवृध्युन्नतमपि लब्ध्वानन्दं दुःखि-
तो भवेत्प्राणी ॥ ९ [८]द्वयमिदमाब्रह्म स्यात्सर्वसमानं सुखं त-
था दुःखम् । सम्मिश्रं जलपंकवदेकस्यानन्तरं भवेद्वा ऽ-
न्यत् ॥ १० वेदयुगानां साहस्रान्तेऽस्माकं भवेद्दिनं यस्य ।
प्रलये प्राकृत उदिते कालवशोऽयं नृणां कथा [९]का स्यात् ॥ ११
भोजनमैथुनमरणाद्यन्ते नृणां भवेन्मतिर्याऽत्र । कोऽमुक्तो ब-
न्धनतो यद्येषा सार्वकालिकी भवति ॥ १२ दिवसे दिवसे
[१०]स्वाप्ययपर्यन्तं तुल्यकर्म संश्रित्य । जीवन्न लज्जते यः प्रा-
ज्ञस्तस्मान्नृणां पशुः को नु ॥ १३ आहाराद्याः सकलप्राणि-

१. अस्वादुं स्वादुं कृत्वा २. मण्डूक इवाचरति. ३. 'एष हि दे-
वत्वाकाङ्क्षयाऽन्वितश्च भवेत्' पा०. ४. ब्रह्मत्वं. ५. विष्णुतां.
६. नास्त्येतेषां. ७. 'लब्ध्वा शतगुणितमपीहा'. ८. चतुर्युगानां
९. 'कैवं' पा०. १०. सुषुप्ति.

CHINTAMPI SWAMI ARCHIVE

समाना विमुक्तिरेतेषाम् । मध्ये मनुजस्यैव हि तत्त्याज्यं मू-
लतो हृदा निखिलम् ॥ १४ भोजं भोजं मृगतृष्णांबुसमानं
विषाधिकं विषयम् । यानि दिनानि गतानीत्यालोच्याशां नि-
राशतां नयतु ॥ १५ आशावेश्या मनुजं दूरादाकृष्य दुः-
खसिन्धुगतम् । कुर्यान्निर्जलरविकरतोयं यद्वन्मृगादिकं ग्री-
ष्मे ॥ १६ संश्रयतीह मनुष्यो यामेव गुणाश्रियं तु तृष्णा
ताम् । कृन्तति तन्त्रीं मूषिक इव चिन्तात्यागतो विजेयैषा ॥
१७ भ्रान्त्वा बहुशो विषये सुखिनो न स्युर्नरा यथा शुन-
कः । आज्याक्तां क्षुरधारां जिह्वालीढां विधाय नात्र सुखी ॥
१८ कूलंकषा स्वतीराद्वल्लीं हृत्वा व्रजेद्यथेह तथा । तृ-
ष्णानिर्झरिणी स्वं चित्तं दूरीकरोति दुर्ग्रहणम् ॥ १९ इन्द्रि-
यभोगः सर्पादतिविष इत्यत्र नैव सन्देहः । फणिदष्टः कोऽपि
हतः स्यादेकत्रान्यतोऽर्बुदे जनुषाम् ॥ २० आगच्छति यद्ग-
च्छति तत्क्षणिकसुखं भवेद्विरज्यास्मिन् । स्थायिसुखे यो र-
क्तः सोऽयं भूयो न जायते नृवरः ॥ २१ संस्पृष्ट्वा क्षरवि-
षयं सुखभाक्स्यामित्युदेति यस्य मतिः । तद्धृदयेऽस्य वि-

१. भुक्त्वा भुक्त्वा. २. 'न्मरीचिकाख्यं'. ३. नदी. ४. नि-
र्झरः कारगत्वेनास्त्यस्या इति. नदी. ५. नरश्रेष्ठः. ६. न-
श्वरम् ॥

CHATTAMPI SWAMI ARCHIVE

योगो भूयः कटुकण्टकायते सुचिरम् ॥ २२ [1]स्पर्शाभोगे म-
नुजः सन्धुक्षितवह्निव[2]र्द्धनेद्रागी । अप्राप्तौ तृष्णाया मूर्छामे-
त्यायुरन्तमृच्छेद्वा ॥ २३ केनाप्यल्पेनास्मिन् सुखमुल्पश्ये-
द्विचारवान्नैव । नृखरोऽपश्यन्स्वयमपि पश्यत्यारूढपातितो
विषयैः ॥ २४ किन्तु विपर्ययतोऽसौ पश्येल्कौलेयको यथा
हतकः । रक्तं स्ववक्त्रपीतं शुष्कास्थ्नः स्यादितीह खादति
यत् ॥ २५ पञ्चभिरपि शब्दादिभिरापुः पञ्चत्वमेव जीवग-
णाः । मृगकरिपतङ्गमीनालिन इह बद्धोऽखिलैर्नरः किमुत ॥
२६ भोगश्चौरोऽटि[3]त्वाऽज्ञाननिशायां प्रसह्य हरतेऽत्र । गुण-
निधिमेकं दुःखी तस्मात्सञ्जायते महांश्च जनः ॥ २७ अमृ-
तप्राप्तिनिमित्ते खाते स्वं यद्धतं करोत्येकः । स्वेच्छावशान्नृ-
देहान्मोक्षार्हात्स्वं हि[4]र्तच्युतं कुरुते ॥ २८ कौले[5]यो यो युक्तो
ऽयुक्तः कौलेय[6]को भवेत् पुरुषः । तस्मात्प्रपञ्चयुक्तो यु[7]क्तो
भूयात् समस्तसंत्यागात् ॥ २९ यद्देहेऽहंभावस्तद्दुष्टाच्छुक्लशोणिताज्जातम् । एते भूमौ दृष्ट्वा नोद्गारं कः करोति
सद्वृत्तः ॥ ३० तस्मादमेध्यजाते नाडीद्वारे सपूय एवैते ।

---

१. विषयाभोगे. २. '—द्रागात्'. ३. अट गतौ. ४. 'तच्च्युतं' 'परश्च्युतं' पा०. ५. कुलेभवः (ढक्) कुलीनः. ६. (ढकञ्) कुक्कुरः. ७. योगी.

CHATTAMPI SWAMI ARCHIVE

नारीभगे नृकीटाः सक्ताः सन्तस्त्यजन्त्यसूंश्चैव ॥ ३१ मां-
सं त्वचा पिनद्धं मरकतवैडूर्यरत्नसंघाटितम्। हेमाचलनिकाशं प-
श्यन्मुग्धोऽत्र बध्यतेऽतिजडः ॥ ३२ आपातदृष्टितो यन्मूढा-
नां भाति पेलवः[1] शिखरी। नेदिष्ठोसौ[2] परुषस्तन्मांसं पश्यतां कु-
चद्वन्द्वम् ॥ ३३ मुक्तादामविभूषितकुचयुग्मं योषितां श्मशा-
नान्ते। श्वभिरास्वाद्यत एतल्लघुपिण्ड इवान्धसो विविच्या-
चत् ॥ ३४ स्त्रीवक्त्रमेव चेन्दुं वक्ष्यन्त्यज्ञास्तु ये त्विटाः क-
वयः। ते शास्त्र स धुमग्ना नूनं क्षारांबुपूरिताक्षगणाः ॥ ३५
स्त्रीवागुरानिबद्धा मा भूयासुर्नृपत्रिण सुजनाः। क्वचिदपि
सन्दृष्ट्वैताः स्वात्मानं संप्रदारयन्त्यह हा ॥ ३६ जाङ्गलिकोऽ-
त्र विमोक्ता किल सर्पादंशयुक्तपुरुषस्य। नारीगरलाज्जाने
नोद्धर्तुं रागनाशतस्त्वितरम् ॥ ३७ मणिनागोऽतिमनोज्ञस्त-
त्स्पर्शाद्दर्शनेन[3] वा म्रियते। म्रियते न स्त्रीदष्टो मरणाधिक-
तापवान्भवेत्तु[4] चिरम् ॥ ३८ कर्कोटमुख्यनागान्न बिभेम्य-
हमेकस्तु योषायाः। भीतियुतस्तद्बाधाशस्त्रं वैराग्यमेव ती-
क्ष्णमिह ॥ ३९ त्यज शंकां भज तस्माद्विरतिमहाराजमाशु
सौख्यकरम्। तत्कृपया शत्रुगणं खण्डं तनुयाः सह-
सैशो मतिमन् ॥ ४० श्लेष्मागारं वक्त्रं विदुरेके लोष्टमेव

१. कोमलः. २. अतिनिकटस्थः. ३. 'नादथो' पा०. ४. 'भ-
वेद्धि'. ५. 'शस्तु पुमन्'॥

CHAITAMPI SWAMI ARCHIVE

बिम्बोष्ठम् । आसां दर्शनमात्रे ध्यायेत् प्राणं नियम्य चात्मा-
नम् ॥ ४१ शास्त्रविशेषसुदर्शनमप्युपनिषदां परीक्षणं चा-
स्तु । एतत्पारिषादे कथनायालं दूरे विरक्तिरित्येषा ॥ ४२
विलुठद्वीचिसमे स्यादायुषि विद्युच्चलेन भोगेन । किं फल-
मेतद्ब्रूयान्मोहान्धः कोऽपि भोगभुग्ज्ञात्वा ॥ ४३ धनमपि
चित्ताकर्षणमेककपर्दात्त्यजेदसूंश्च नरः । सोऽप्यनुगच्छति
किं स्वं गच्छन्तं मृत्युवक्त्रमत्युग्रम् ॥ ४४ अत्राधिक्षिति
को वा मुक्तः स्यान्मृत्युपाशतो लोभी । पञ्चदशानर्थैर्धनमुप-
जुष्टं सञ्चयी न भूयात्तत् ॥ ४५ उद्दिश्य यच्छरीरं भोग्यं
सम्यक् चिनोति नरशूलः । एतद्देहस्थैर्यं पल्लवकोट्यम्बुस-
म्मितं चलनात् ॥ ४६ वीचीग्रथनं वायोर्बन्धनमाकाशख-
ण्डनं च भवेत् । क्वचिदप्यास्था नायुषि परिदृष्टा युज्यते
न वा तद्वत् ॥ ४७ जातः स एव भूमौ यः सम्यक्साधु-
जीवितः परमः । जायेत नेह भूयो जरठस्वरास्ते भवन्ति
ये चान्ये ॥ ४८ एते नैव ममाहं नैतेषां स्यां पदार्थनिच-
यानाम् । आस्थायैतं निश्चयमनुसन्धत्तां वृषाकपिं सततम् ॥
४९ अर्थानां चित्तमिदं कारणमास्मिन्प्रतिष्ठितं त्रिजगत् ।
अमनस्त्वं गमिते तन्मनसि चिदेका मनश्चिकित्स्यं तत् ॥ ५०

१. कपर्दः. २. 'च वा'. ३. 'शिष्टा ये'.

CHATTAMPI SWAMI ARCHIVE

इह कथितौ द्वौ मार्गौ चित्तविनाशाय सांख्ययोगौ तौ । सां-
ख्यज्ञानं वक्ष्येऽत्रोक्तो योगो रहस्यमञ्जर्याम् ॥ ५१ संख्या-
यतेऽत्र संख्या सम्यग्दृष्टिर्भवेच्च सांऽत्रेत्यम् । सांख्यं साक्षा-
ज्ज्ञानं तस्माच्छ्रुत्युद्भमान्न कपिलोक्तम् ॥ ५२ अत्यन्ताकु-
लमनसो नैव विचारात्स्वरूपसंसिद्धिः[1] । सोऽयं योगी भूया-
द्यो मोहादेव संवृतात्मा सन् ॥ ५३ अव्याकुलधीस्तस्य तु
विहितः पन्था द्वितीय उरुगीतः । सांख्यसमाह्वयः फलदो
द्रागभ्यासं करोत्वमन्दं तत् ॥ ५४ अत्राप्यात्मविबोधकशा-
स्त्रालोकोऽथ साधुसंसर्गः । प्राणस्पन्दनिरोधनमेवं निःशेष-
वासनात्यागः ॥ ५५ युक्तय[2] एता मनसो विजयेऽङ्कुशवं[3]-
द्विपेन्द्रदमने स्युः । प्राणस्पन्दनिरोधः कर्तव्यो राजयोगिनैवं
तत् ॥ ५६ अस्तमितेऽपाने हृदि प्राणो नोदेति यावदभ्यु-
दिता । तावत्कुंभावस्था योगिजनैर्याऽनुभूयते संततम्[4] ॥ ५७
यातेऽस्तं बहिरनिले प्राणेऽपानोऽपि नोद्गतो यावत् । पूर्णां
समामवस्थां तावज्जानान्ति कुंभकं बाह्यम् ॥ ५८ बुध्वात्मा-
नं विजने तारं जप्त्वा विधानतोऽनुदिनम् । जेयं चित्तं क्र-
मशो भ्रूध्यानाद्वा गुरोरनुज्ञातः ॥ ५९ मुक्त्वाऽहंकृतिमचल-
ब्रम्हाकारेण या मनोवृत्तेः । सान्तत्यस्थितिरन्याऽनन्तारितेयं

१. 'सम्पत्ति': २. उपायाः. ३. 'इव करीन्द्रः'. ४. स-
रसम् ॥

CHATTAMPI SWAMI ARCHIVE

समाध्यवस्था स्यात् ॥ ६० तत्वाववोध एवाशयतूलाग्नि-
र्णामसावेकः । प्रोक्तः समाधिशब्देनेह न तूष्णीमवस्थितिः
कथिता ॥ ६१ ध्यातृध्यानोपोहे ध्येयस्यैवैकतानता मन-
सः । संप्रज्ञातसमाधिपदोक्तादन्या निवातदीपाभा ॥ ६२
घोर्वाय्वाग्निजलोर्व्यप्वाब्रह्मास्थावरं 'त्विहाभिन्नाः । सच्चिन्मु-
ख्या' भिन्ने द्वितये ते रूपनामनी त्याज्ये ॥ ६३ सच्चित्सु-
खैकसक्तः पश्चाद्धृदयेऽथवा वहिः कुर्यात् । सततं समाधि-
निष्ठां यस्यां दोदुह्यतेऽमृतांबुनिधी ॥ ६४ मूढा घोराः
शान्ता मनसः स्युर्वृत्तयस्त्रिधेत्येवम् । भीमोहाद्या मूढास्तृ-
ष्णालोभादिकास्तथा घोराः ॥ ६५ विरतिक्षमादिकोक्ताः
सम्यक्सात्विक्य एव शान्ताख्याः । वृत्तय आसु चिदेका सु-
खमपि शान्तासु बिंबितं भवति ॥ ६६ कर्दमितांभोबिंबि-
तचन्द्रोऽस्पष्टः स एव शुद्धजले । सुव्यक्ततया दृश्यस्तद्वद्
ब्रह्मापि वृत्तिषु द्विविधम् ॥ ६७ आनन्दांशतिरोभैव इह
मूढादिद्वयोश्च मालिन्यात् । वृत्योश्चित्प्रतिफलनं देश्रं नै-
र्मल्यतः समाख्यातम् ॥ ६८ शुद्धजले शिख्यौष्ण्यं संक्रम-

१. आफलविपाकाच्चित्तभूमौ शेत इति कर्तरि अच्. वासना.
२. त्यागे. ३. 'समाध्यभिधेयादन्या'. ४. 'स्वश्वसनाग्नि'.
५. '—ब्रह्मस्तंवमतच' ६. } 'नामरूपके'. ७. शुद्धजले. ८.
हृतिरिह. ९. अल्पम् ॥

CHATTAMPI SWAMI ARCHIVE

ते नात्र तत्प्रकाशो यत् । काष्ठे प्रकाश औष्ण्यं द्वयमपि शा-
न्तासु चित्सुखे व्यक्ते ॥ ६९ यद्यत्काङ्क्षोपरमे वृत्तिष्व-
न्तर्मुखासु सुखमात्रम् । प्रतिबिंबति तद्ब्रह्मैवास्य विचार-
स्त्वतीवसुखतः स्यात् ॥ ७० सत्ता चितिः सुखं चेत्येवं
ब्रह्मस्वभाव उदितः स्यात् । त्रेधा ब्रह्माण्डादिषु सन्मात्रं
ब्रह्मणो विविच्यासिन् ॥ ७१ अन्यत्र नामरूपे उत्सृज्यैवं
विचिन्त्य जाड्यांशे । सच्चित्सुखे स्वमनसो नैश्चल्येन वातिष्ठ
मुच्येथाः ॥ ७२ सविकल्पनिर्विकल्पकभेदाद्धृदये द्विधा
समाधिः स्यात् । दृश्यानुविद्धशब्दानुविद्धभेदा द्विधा पुनश्चा-
द्यः ॥ ७३ कामाद्याश्चित्तगता दृश्यास्तत्साक्षिरूपचैतन्यम् ।
साक्षित्वेन विभावय सततं दृश्यानुविद्ध एवासौ ॥ ७४
सच्चित्सुखस्वरूपोऽसंगोऽद्वैतस्तथा स्वयंज्योतिः । अस्मीति
शब्दविद्धः सविकल्पसमाध्यवस्थया ज्ञेयः ॥ ७५ अनुभूति-
रसावेशात्त्यजतो दृश्यं तथैव शब्दश्च । स्यान्निर्विकल्पश-
ब्दावेधः सुतरां समाधिरतिरम्यः ॥ ७६ सम्प्रज्ञातसमाध्य-
नुशीलितचित्ते प्रशान्तवृत्तौ तु । परमानन्दमणीमयदीपक-
कलिकोदयः समाधिः स्यात् ॥ ७७ हृदये प्रकाशशून्यं
शून्याच्छून्यं बहिश्च सर्वत्र । सर्वत ऊर्ध्वाधः परिपूर्णं स-

१. 'ईदूदेद्द्विवचनं प्रगृह्यम्'. संत्यज्योति पा०.

CHATTAMPI SWAMI ARCHIVE

च्चिद्रसः समाधिः स्यात् ॥ ७८ हृदि वा बाह्येऽप्येवं यस्मि-
न्कस्मिंश्च वस्तुनि स्वैरम् । कुर्यात्समाधिमादेः सत्तया नि-
ह्नवेन जाड्यस्य ॥ ७९ एवं समाधिनिष्ठामनुतिष्ठत उ-
द्भूतो महामोहः । नष्टो यदा स्वदेहे सर्वत्र मनोगतिः
समाधिः स्यात् ॥ ८० ऐदम्पर्यं वक्तुं वेदान्तस्यौचितीं
समाऽप्येवम् । सम्यगपोर्ह्येत इह समदृष्ट्यै प्रतिपक्षभूतदर्श-
नवाक् ॥ ८१ केचिज्जिगीषयैवं वक्ष्यन्त्यसतो जगज्जनिं मू-
ढाः । अन्ये कुतर्कवादिन उच्चैर्घोषन्ति नित्यतां जगतः ॥
८२ कारणमसदिति वादी प्रष्टव्यस्तत्पिता नु वैन्ध्यार्भः ।
एवं नो चेत्तज्जनिरसतो जन्मास्य सिद्धमत्र कथम् ॥ ८३
शक्त्या स्वस्यासत्स्यात्कारणमिति चेन्न शक्तिरप्यसतः । व्य-
तिरेकान्वययुक्त्या सद्बीजस्यैवकार्यकृतिशक्तिः ॥ ८४ नि-
र्वचनानर्हमिदं जगदेवानित्यमत्र चिन्तयताम् । स्याच्चेन्नि-
त्यमिदं कथमुत्पत्तिनिरोधभृद्भवेदग्रे ॥ ८५ सावयवत्वात्
पृथिवी घटवद्भवनाशसंयुता ह्युदिता । यद्यत्सावयवं तन्ना-
शयदिति युक्तितः क्षरा नूनम् ॥ ८६ कापिलकौणंभुजादि-

१. 'सुखम्' २. 'हृद्यन्तर्बहिराहो'. ३. औचित्यम् ४. निर-
स्यते. ५. शास्त्र. ६. घुषिर् शब्दे. 'घुष्यन्ति नित्यमेतदिति'.
७. वंध्यासुतः. ८. 'अन्वयमुख्यदृशा यत्'. ९. व्याप्तितः. १०.
काणाद.

CHATTAMPI SWAMI ARCHIVE

क्रमाविलमिह नो मतं भवेद् ग्राह्यम् । आर्षमपीति समासा-
द्वक्ष्ये रोमान्थितं बहुज्ञैस्तत् ॥ ८७ कश्चित् कपिलो धाम्ना
नेश्वरमंगीकरोति चितिरूपम् । प्रकृतिं साम्यावस्थामेवोक्त्वा
कारणत्वतो जगतः ॥ ८८ बुद्धिमतैतत्स्वधियैवालोच्याज-
स्रमाशु संत्याज्यम् । जडरूपायाः प्रकृतेर्जानिरस्य कथञ्चना-
पि नेत्युक्तेः ॥ ८९ पयसो जडतायामपि वत्सस्य विवृद्धये
भवेच्चेत्तत् । चेतनमेकमधिष्ठायैवं प्रकृतिर्न कारणं जगतः ॥
९० नाचैतन्यात्प्रभवितुमुत्सहते न प्रधानमथवा तत् ।
स्याच्चेन्निसर्गकरणं नित्यं सर्गप्रसंग इति दुष्टम् ॥ ९१
कापिलमपिचाकर्तैवाहो भोक्ता यदीह भवति पुनः । कृतहा-
न्यकृताभ्यागममुखदोषोऽसंग एव भुक्तिरुत ॥ ९२ अवय-
वरहितं कणभुक्परमाणुं वक्तिकारणं जगतः । अनयोर्योगे
द्व्यणुकक्रमतोऽस्तु जगाच्छिवेच्छयेति मुधा ॥ ९३ परमाणा-
वणुकान्तरयोगः सर्वांशतोऽथवैकांशात् । किं न परस्परम-
नयोः प्रथमे पक्षे भवत्यहो लीनम् ॥ ९४ आणवमोक्षो
नैवं मतमपरं चेन्निरंशता क्व गता । पृच्छासहस्रतोस्मिन्न-
नवस्थादीन्विभावयेद्विद्वान् ॥ ९५ नास्तिकबार्हस्पत्यं सौ-
गतमन्यं समाश्रयेद्यो वा । सोऽट्टगोलांगूलन्यायाद्दुःखाम्बु-

---

१. चर्वितचर्वणम्.

CHATTAMPI SWAMI ARCHIVE

समाध्यवस्था स्यात् ॥ ६० तत्वावबोध एवाशयतूलाग्नि-र्नृणामसावेकः । प्रोक्तः समाधिशब्देनेह न तूष्णीमवस्थितिः कथिता ॥ ६१ ध्यातृध्यानोपोहे ध्येयैकतानता मनसः । संप्रज्ञातसमाधिपदोक्तादन्या निवातदीपाभा ॥ ६२ घोर्वाख्वाग्निजलोर्वीष्वाब्रह्मास्थावरं 'त्विहाभिन्नाः । सच्चिन्मुख्या' भिन्ने द्वितये ते रूपनामनी त्याज्ये ॥ ६३ सच्चित्सुखैकसक्तः पश्चाद्धृदयेऽथवा बहिः कुर्यात् । सततं समाधिनिष्ठां यस्यां दोदुह्यतेऽमृतांबुनिधी ॥ ६४ मूढा घोराः शान्ता मनसः स्युर्वृत्तयस्त्रिधेत्येवम् । भीमोहाद्या मूढास्तृष्णालोभादिकास्तथा घोराः ॥ ६५ विरतिक्षमादिकोक्ताः सम्यक्सात्विक्य एव शान्ताख्याः । वृत्तय आसु चिदेका सुखमपि शान्तासु बिंबितं भवति ॥ ६६ कर्दमितांभोबिंबितचन्द्रोऽस्पष्टः स एव शुद्धजले । सुव्यक्ततया दृश्यस्तद्वद् ब्रह्मापि वृत्तिषु द्विविधम् ॥ ६७ आनन्दांशतिरोर्भव इह मूढादिद्वयोश्च मालिन्यात् । वृत्योश्चित्प्रतिफलनं दृश्रं नैर्मल्यतः समाख्यातम् ॥ ६८ शुद्धजले शिख्यौष्ण्यं संक्रम-

१. आफलविपाकम्चित्तभूमौ शेत इति कर्तरि अच्. वासना. २. त्यागे. ३. 'समाध्यभिधेयादन्या'. ४. 'स्वश्वसनाग्नि'. ५. '—ब्रह्मस्तंबमवचा' ६. 'नामरूपके'. ७. शुद्धजले. ८. हृतिरिह. ९. अल्पम् ॥

CHATTAMPI SWAMI ARCHIVE

ते नात्र तत्प्रकाशो यत् । काष्ठे प्रकाश औष्ण्यं द्वयमपि शा-
न्तासु चित्सुखे व्यक्ते ॥ ६९ यद्यत्काङ्क्षोपरमे वृत्तिष्व-
न्तर्मुखासु सुखमात्रम् । प्रतिबिंबति तद्ब्रह्मैवास्य विचार-
स्त्वतीवसुखतः स्यात् ॥ ७० सत्ता चितिः सुखं चेत्येवं
ब्रह्मस्वभाव उदितः स्यात् । त्रेधा ब्रह्माण्डादिषु सन्मात्रं
ब्रह्मणो विविच्यास्मिन् ॥ ७१ अन्यत्र नामरूपे उत्सृज्यैवं
विचिन्त्य जाड्यांशे । सच्चित्सुखे स्वमनसो नैश्चल्येन वातिष्ठ
मुच्येथाः ॥ ७२ सविकल्पनिर्विकल्पकभेदाद्धृदये द्विधा
समाधिः स्यात् । दृश्यानुविद्धशब्दानुविद्धभेदा द्विधा पुनश्चा-
द्यः ॥ ७३ कामाद्याश्चित्तगता दृश्यास्तत्साक्षिरूपचैतन्यम् ।
साक्षित्वेन विभावय सततं दृश्यानुविद्ध एवासौ ॥ ७४
सच्चित्सुखस्वरूपोऽसंगोऽद्वैतस्तथा स्वयंज्योतिः । अस्मीति
शब्दविद्धः सविकल्पसमाध्यवस्थया ज्ञेयः ॥ ७५ अनुभूति-
रसावेशात्त्यजतो दृश्यं तथैव शब्दञ्च । स्यान्निर्विकल्पश-
ब्दावेधः सुतरां समाधिरतिरम्यः ॥ ७६ सम्प्रज्ञातसमाध्य-
नुशीलितचित्ते प्रशान्तवृत्तौ तु । परमानन्दमणीमयदीपक-
कलिकोदयः समाधिः स्यात् ॥ ७७ हृदये प्रकाशशून्यं
शून्याच्छून्यं बहिश्च सर्वत्र । सर्वत ऊर्ध्वाधः परिपूर्णं स-

---

१. 'ईदूदेद्द्विवचनं प्रगृह्यम्'. संत्यज्योति पा०.

CHATTAMPI SWAMI ARCHIVE

धेर्न मुच्येत ॥ ९६ मीमांसाकृत्पक्षे न व्यतिरिक्तार्थता क्रियातोऽन्या । आम्नायस्य स कर्माणि फलदातृत्वं च पश्यतीशे न ॥ ९७ उपनिर्मुखस्य सदेः क्विपि यदिहोपनिषत्पदस्य निष्पत्तिः । श्रुतिमूर्धज्ञैस्तज्ज्ञैरखण्डि युक्त्याऽनुभूतिस्त्वेतत् ॥ ९८ उत्पत्त्यसंभवादित्यस्मान्नोत्पद्यते पराज्जीवः । न च कर्तुः करणमितिव्यासगिराऽसंगताऽत्ररात्रोक्तिः ॥ ९९ तस्माद्द्वैतं सगुरुं त्यक्त्वाऽद्वैतार्यमाश्रयन् सत्स्वम् । बुध्वात्मानं विस्मृतगळमणिकल्पं विदेहमुक्तस्स्यात् ॥ १०० ॥ यालाभिधगुरुभगवत्कृपयाऽसितकण्ठतीर्थसञ्जाता । अद्वैतपारिजातावरजेयं जयतु चित्सुधार्याख्या ॥ ॐ ॥

इति श्रीनीलकण्ठतीर्थकृता

चित्सुधाऽऽर्याशती

समाप्ता ॥

---

१. जैमिनिः. २. षद्‌ल—विशरणगत्यवसादनेषु. ३. 'स्तदिदम्' ४. ब्रह्मसूत्रात् ५. सू पा० ॥

CHATTAMPI SWAMI ARCHIVE

## अथ श्रीहरिनवकप्रारंभः ॥

ॐ ॥ वृत्रप्रध्वंस्यरिद्रुद्वदद्भुतचरितभरामोदपाथोवगाढुं स्वर्गगाखर्वगर्वकषमृजुरतिभूर्मन्मनोमत्तहस्ती । चित्[3]खाटाटामुशन्यात्यज जनिहर पीयूषशुम्[4]भत्कृपातो भाव्यं तस्मिंस्त्वयातः परतर परमानन्द विष्णो नमस्ते ॥ १ भूयात्स स्फूर्जथुस्मारैककरधृतसत्पाञ्चजन्योत्थपञ्चास्यारावोत्पिष्टपुष्टाररुहृदयमदोद्मदन्तावलोऽजः । [6]रक्षणेऽभीक्ष्णं विभ्रेस्तत्पदधृतमनसोऽस्यापुनर्जन्म यच्छंस्तस्मा आनन्दचन्द्रामृतरससरासिक्केशेश विष्णो नमस्ते ॥ २ भेदज्ञानोदकस्नूस्नपनविधिकृतेरानुपूर्व्युन्नं उच्चैः सच्छास्त्रालोकहालोद्गहनमसृणिते ऽद्वन्द्ववेद्यन्तरस्थे । हृत्क्षेत्रे तत्प्रलक्ष्यं वप बहुकृपयेशांग भावत्कमित्यं संवित्सस्यं भवार्णोनिधिहतिबडवाग्नेऽज विष्णो नमस्ते ॥ ३ स्वादुंकारं गिलन्तं विषय[11]कलमम्[13]मुञ्छातिवृत्याऽप्रशस्तं चौरंकारं शपन्मद्धृदय-

---

१. अरिद्रुः शत्रुघातुकः. द्रुश् हिंसायाम् . २. गाहेरुदित्वादिड्विकल्पः. ३. चिद्युसद्भ्रमणम् . 'अटापर्यटनं' इति रत्नकेशः. ४. शुम्भ—शोभार्थे. ५. 'स्मायक' पा०. ६. रक्षतेर्नङ्. ७. निक्षेस. स्नवतेः क्विप् . मि० ८. आनुपूर्वी = परम्परा. उन्ने = क्लिन्ने ९. 'हालो हले पुमान्' मे०. १०. गृ—निगरणे. 'अचि विभाषा इति विकल्पाल्लत्वम्'. ११. व्रीहिशेषः (तं) १२. 'उञ्छः कणश आदानम्' इति यादवः ॥

CHATTAMPI SWAMI ARCHIVE

शुकशिशुं संक्लिशित्वा[1]ऽस्मि सुस्थः । तद्भोः कारुण्यसंज्ञा-
गुफितं[2]मज वितंसं[3] त्वमाप्य[4]ात्मसात्त्वं कृत्वा सच्चित्सुखैकात्मक-
मपि कुरु देवेश विष्णो नमस्ते ॥ ४ सर्वीयं[5] कार्यजालं वि-
दधतु विधिरुद्रेन्द्रमुख्या ऋते सम्पत्ते[6]स्तद्वीर्वृतास्ते श्रवसि कृत-
करा आस्य[7] तं यान्त्यनीशाः । लुञ्चित्वा[8] पञ्चपापान्यपि प-
रिणतचित्केवलत्वं विधातुं त्वंवत्का[9]रुण्यवार्द्धिस्त्वमज विजयसे
देव विष्णो नमस्ते ॥ ५ कैलासाद्रीन्द्रवादी हयमुखं[10]खादिरः
सन्मनःखे लुदीयाद्यावन्मन्थक्षमाभृद्धुमुधुमितसुधावारिराशिप्रका-
शाः । तावन्निर्यान्ति वक्त्राद्भणितय इति नो वच्म्यहं गौ-
णवृत्या वैकुण्ठावाञ्च मां त्वं कषितपुरनतानन्त विष्णो
नमस्ते ॥ ६ वीणादण्डस्थशुष्युद्धतभुजगवधूश्चक्रजालं पं[11]-
वित्वा गत्वा शम्पाभमुच्चैरमृतकुहरमुत्क्षिप्य सोमं[12] दधाति ।
मद्यं तत्प्लावितात्मा परमरसमजंस्त्वत्त उत्स्यामि[13]भिन्नो यस्मा-
न्मन्दारैश्चन्[14]न्दायित परमकृपाधार विष्णो नमस्ते ॥ ७ ॥

---

१. क्लिशः क्त्वेति वेट्. २. गुफ—ग्रन्थे. 'ग्रथित' पा०. ३. वीतंसम्. ४. आप्य = प्रापय्य. (आङ्पूर्वाल्लप्). 'विभाषापः' इ-ति विकल्पः. ५. सर्वस्मै हितम्. ६. सम्पत्तिर्मुक्तिः. ७. नि-रस्य. ८. लुञ्च—अपनयने. ९. त्वं वेति पा०. १०. चन्द्रः खिदेः किरच्. ११. पूङश्च इति वेट्. (संशोध्य). १२. सो-मामृतम्. १३. 'तस्य उदिति नाम' इति श्रुतिः. (तेन ब्रह्म) १४. चन्दश्चन्द्रः पचाद्यच्. 'चन्द्रो हिमद्युतिः' को०.

CHATTAMPI SWAMI ARCHIVE

नैर्चत्येषोऽजामित्याविलहृदयममुं मानुमंस्थाः सुरद्भूक्ककलोम-
शिलष्टवर्ति[2]मृतपद विषमंपश्य सत्ताकतोऽस्मिन् । त्रैलोक्ये-
चोपमानं त्विति नु[3]वतु कथं त्वां भिर्ये।मूढ उच्छास्त्रावेशे त-
न्मृषित्वा सकृपमिममवानन्त विष्णो नमस्ते ॥ ८ सोरस्ता-
हं भजन्रोदिति बत भगवन्कस्य वाऽभ्रेऽत्र संसृत्यंभोधौ त्वत्प्र-
ह्वाणेऽमरनतपद भोः शांभवीष्टस्तु भूमन् । तत्त्वं भीमिद्र-
ता[6]म्यद्धृदयमिमम[7]जन्नमतः संप्रपाद्यङ्ग।विश्राम्यत्सुधासान्द्रित-
सुखमृषर्यन्देव विष्णो नमस्ते ॥ ९ श्रीबालकाह्वभगवच्चर-
णारुणाब्जहंसायिता।सितगळार्थकतीर्थजातम् । विष्णोर्नवोप-
लमिमं नैवकं दधाति कण्ठे य एष उभयत्र भवेत्स्वरादसः॥१०॥

इति श्रीस्तवरत्नहारान्तर्गतं

श्रीविष्णुनवरत्नं

समाप्तम् ॥

---

१. ऋच—स्तुतौ तु०. २. विः पक्षी. इतंगतम् . ३. णू स्तवने. ४. भीमूढः. भयं भिया इति शब्दार्णयः. ५. शाम्भवी नाम मुद्रा योगसम्प्रदायप्रसिद्धा. ६. भयभिदुर—। तम—खेदे. ७. अज—गतौ. ८. ऋषी—गतौ. ९. नवः स्तवः ॥

CHATTAMPI SWAMI ARCHIVE

रुतालंक्रियाः । नोचेद्यद्यज सन्त्यजात्रभवतो भृत्यं तु मा[1]ऽ-
होस्वि[2]दीट् त्वं वाऽथ त्यज पि[3]ष्टपाधिपतितां कारुण्यवारांनि-
धे ॥ २ पश्येयं तव रूपधेयमचलं यन्नित्यबोधात्मकं स्वत्वे-
नाज यथा तथा कुरु विधिं श्रीकण्ठकण्ठप्रभ । त्रैयन्ताभिध-
सोदरो[4]र्दरागिरां मार्द्वीकहृद्यां सदा स्वादं स्वादमुदीतैत्रृत्तिरवागे-
[6]त्येषोव मां माप! तत् ॥ ३ त्वामीतस्य हरे [7]कृपापुरण!
भो बोधामृतोदं तु हृच्चे[8]लंक्नोपममुप्य येन वत्रृषे नित्य त्वया
माधव! । स त्वं मां सुखबन्धसिन्धुरधुरीणं धेहि शीघ्रं
कृप जालेकृत्य [9]केषन्कलो[10]कुलमहं नौमि त्रिलोकीपतिम् ॥ ४
हे शार्ङ्गिस्त्वदृते [11]पंचेलिमकृपाच्छ्रीनी[12]थनाथं हरेः पादांभोजस-
तीर्थ्यनिःसृतमर[13]न्दगळिं प्रभो माऽवितुम् । कोन्यो भावमुपैतु
देव तै[14]र्पदात्मान्तःपटीरात्मक नो वित्सोहमुमाधवाचिंतामिति
त्वामेव सेवे सदा ॥ ५ क्वायं जाड्यवशंवदः क्व फणि-

---

१. मां. २. ईट्=ईश. ३. लोकेशताम्. ४. 'गिरं' पाठः. ५, इण्—गतौ. ६ अत्रगुरुत्रान्. ७. करुणाब्धे! पुरणः समुद्रः. 'कृपाभरण' पाठः. ८. हृच्चेलं क्नोपयित्वा—परिपिच्य 'चेलेक्नोपे' इति णमुल्. ९. कष—हिंसायाम्. १०. श्रमानस्यम् (दुःखम्) ११. परिपक्वानुग्रहात्. १२. श्रीनाथ एव नाथो यस्य तम्. १३. मरं मरणं द्यतीति मरन्दो मकरन्दः. १४. दन्दह्यमानमानसानां चन्दनशीतलस्वभाव! ॥

CHATTAMPI SWAMI ARCHIVE

राङ्ब्रह्मा[1]ण्युपश्लोक्यसुश्लोकै[2]स्त्वं भगवन्निशाकरकरस्पर्द्धिस्मिते-त्यन्वहम् । जानन्नप्यरविन्दनाभ ! परवांस्त्वत्पादनिष्ठासरी-सृष्टोघन्मुखरीकृतोरीति भणाम्येवं क्षमस्वाखिलम् ॥ ६ वैकु-ण्ठेशपयस्यमानचरितं लोकंपृ[3]णं सांप्रतं पायं पायमयं तु कौक्कु[4]-टिकहार्दानन्दविन्दं दधे । स्वान्तं कान्[5]तपदेऽद्वितीयपरविद्या-चु[6]ञ्चुरास्मिस्ततः कारुण्यामृतपूर्णदृग्भव भवज्वालाजलाधा-रक ! ॥ ७ स्वारा[7]मात्मदरीसुखासिक हरे मारागमारामभूदे-वेश द्यु[8]मणिप्रविष्ट येस[9] मे नीरोगं[10]भावाप्तये । वृत्तिं मेऽज वि-रच्य हैमेन[11]सु[12]धाकारांशुकल्पां प्रभो त्वा[13]ऽहं शतशः परीत्य पदयोर्नम्रीभवाम्यच्युत ॥ ८ हे देवेज्य सर्वसहस्य[14] उपा-स्ति मेऽज भो ईयुषो नित्यादीनै[15]वैभञ्जनोत्सुकतया देव प्रसन्नो

१. 'ब्रह्माणीवचनं वाचा' इति शब्दार्णवः. २. 'पद्ये यशसि च श्लोकः'. ३. पृण—तर्पणे. ४. कौक्कुटिको = भिक्षुः. ५. क-स्य ब्रह्मणोऽन्तो यस्मात्स तयोक्तः. विष्णुपदे. ६. 'तेन वित्तश्चुं-चुप् चणपौ' इति चुंचुप्. 'चुंचवजास्मिन्' पा०. ७. स्वात्मारा-मजनहृदयगुहावास. ८. सूर्यमण्डलान्तर्गत. ९. यसु—प्रयत्ने. १०. 'नीरोगता' पाठ. ११. हेमन्ते भवः, (अण्). १२. सु-धाकारा अंशवो यस्य, तथाविधाम्. १३. त्वाम्. १४. प्रस[illegible]-य. 'प्रपूर्वकात्सदेः क्विप्'. १५. 'दोष आदीनवः' इति कोशः ॥

CHATTAMPI SWAMI ARCHIVE

## अथाष्टाक्षरस्तोत्रम् ॥

ओमधिरूढं गरुडं कमलागूढं[1] यतात्मनां नीडम् । अ-
वगाढं हृदि गाढं कलये निबिडं रमापतिं क्रोडम् ॥ १ न-
म्रजनानां शरणं कारणमखिलस्य निर्धुतावरणम् । वैरणं[2]
लोके हृदये कलये चरणं वियद्धुनीहरणम ॥ २ मोक्षदशा-
सम्पद्यं त्रैयन्तेषु प्रतिष्ठितं वेद्यम् । स्वान्ते सन्ततमाद्यं क-
लये भवरोगभेदकं वैद्यम् ॥ ३ नादातीतमपारं दुर्हृद्दूरं भ-
वाम्बुधेस्तीरम् । आसुरनागमयूरं कलये सारं चराचरांकुरम्॥
४॥ राजन्मार्गे सुप्तां बध्वा मूलं[3] गलं च सन्तप्ताम्। कृत्वा
मरुतालुप्तां मूर्तिं कलये द्विर्षट्[4]पदाक्लप्ताम् ॥ ५ यन्नाम्ना-
कृतबन्धो भिन्नस्त्वत्तो न यत्तदन्धः सन् । अत्रानन्धश्रुत्या
सैन्नं चित्तं निवेदये तेऽन्नम् ॥ ६ णत्वं[6] स्यादित्यनिशं वृत्ते
सौषुम्नगह्वरेऽपीशम् । कलयेऽहं गेहेशं खेलनगमने न चि-
न्तये पाशम् ॥ ७ अनहंक्रान्तमनन्तं मामकहृदये सदा र-

---

१. 'ऽपीडं' पा०. २. (प्राकारं) सेतुम्. ३. मूलाधारम्. (मूलबन्धं जालं धरबन्धं च कृत्वेति भावः). ४. द्वादशान्तास्यस्थाननिर्व्यूढाम्. ५. लीगम्. ६. (कोटरीशक्तिसहितउमाकान्तो णकारार्थं इति विद्यारण्याः) बिन्दुदेवत्वं निर्गुणत्वमिति यावत् ॥

CHATTAMPI SWAMI ARCHIVE

माकान्तम् । नाभसमुद्रावान्तं[1] चान्द्रं[2] बध्वा प्रतर्पये कान्तम्[3]॥ ८ ॥ बालाह्वयगुरुभगवाच्छिष्यासितकण्ठतीर्थरचितामिदम् । जपिता यो भक्तियुतः स स्वाराज्यश्रियं लभेतैव ॥ हरिः ॥

इति श्रीनीलकण्ठतीर्थकृतं अष्टाक्षरस्तोत्रं

समाप्तम् ॥

---

## अथ हरिभक्तिमरन्दः ॥

---

हरिः ॥ माभि[1]:काकृतकेष्टिदृष्टिसुमणिश्रेणीकृते संपणी- कर्तुं चित्तविवर्तकाचमचिरादित्यत्यरं यत्यते । यद्भृत्येन म- या कयापि विधया घेया कृपा तत्त्वया हे विष्णो फालि[2]नामृ- तोदयईशाकण्ठोक्तकारुण्यतः[3] ॥ १ विष्णो त्वय्यधिविष्टपः[4] सम इति ह्यगैतमेवं सति त्रातुं त्वल्कमलं न हृत्कमलमौभोगै[5]-

---

१. 'ऽचान्तं.' २. चन्द्रामृतम् . ३. विष्णुम् . (कः ब्रह्मा ॥)

१. (माधवस्याकृत्रिमस्नेहदृष्टिरूपाविशिष्टरत्नश्रेण्यर्थम्). इष्-अभिलाषे. (क्तिन्). 'इष्टदृष्टि' पाठः । २. फालिनं फलेन निश्चितम् 'फलबर्हाभ्यामिनच्'. ३. 'आपं चैव हलन्तानां' इत्युक्तेर्दृशेति प्रथमा. ४. 'विष्टपः पुमान्' इति बोपालितः. ५. यत्नैः ॥

CHATTAMPI SWAMI ARCHIVE

रुतालंक्रियाः । नोचेद्यज सन्त्यजात्रभवतो भृत्यं तु [1]भाऽ-
होस्वि[2]दीट् त्वं वाऽथ त्यज पि[3]ष्टपाधिपतितां कारुण्यवारांनि-
धे ॥ २ पश्येयं तव रूपधेयमचलं यन्नित्यबोधात्मकं स्वत्वे-
नाज्ञ यथा तथा कुरु विधिं श्रीकण्ठकण्ठप्रभ । त्रैयन्ताभिध-
सोदरोर्द[4]रगिरां मार्द्वीकहृद्यां सदा स्वादं स्वादमुदीतै[5]त्रृत्तिरवागि-
[6]त्येषोव मां माप! तत्॥ ३ त्वामीतस्य हरे कृ[7]पापुरण!
भो बोधामृतोदं तु हृच्चे[8]लक्नोपममुप्य येन ववृषे नित्य त्वया
माधव!। स त्वं मां सुखबन्धुसिन्धुरधुरीणं धेहि शीघ्रं
कृप जालेकृत्य [9]कषन्कलीकुंलमहं नौमि त्रिलोकीपतिम् ॥ ४
हे शार्ङ्गिस्त्वदृते [10]पं[11]चेळिमकृपाच्छ्री[12]र्नाथनाथं हरेः पादांभोजस-
तीर्थ्यनिःसृतमरं[13]दगळें प्रभो माऽवितुम् । कोन्यो भावमुपैतु
देव तै[14]पदात्मान्तःपटीरात्मक नो वित्सोहमुमाधवार्चितमिति
त्वामेव सेवे सदा ॥ ५ क्वायं जाड्यवशंवदः क्व फणि-

---

१. मां. २. ईट्=ईश. ३. लोकेशताम्. ४. 'गिरं' पाठः.
५, इण्—गतौ. ६. अत्रगुरुत्रान्. ७. करुणाब्धे! पुरणः स-
मुद्रः. 'कृपाभरण' पाठः. ८. हृच्चेलं क्नोपयित्वा—परिषिच्य
'चेलेक्नोपं' इति णमुल्. ९. कष—हिंसायाम्. १०. अमा-
नस्यम् (दुःखम्) ११. परिपक्वानुग्रहात्. १२. श्रीनाथ एव
नाथो यस्य तम्. १३. मरं मरणं धर्तीति मरन्दो मकरन्दः.
१४. दन्दह्यमानमानसानां चन्दनशीतळस्वभाव!॥

CHATTAMPI SWAMI ARCHIVE

राड्ब्रह्मा[1]ण्युपश्लोक्यसुश्लोकै[2]स्त्वं भगवन्निशाकरकरस्पर्द्धिस्मिते-त्यन्वहम् । जानन्नप्यरविन्दनाभ! परवांस्त्वत्पादनिष्ठासरी-सृष्टोद्यन्मुखरीकृतोरीति भणाम्येवं क्षमस्वाखिलम् ॥ ६ वैकु-ण्ठेशपयस्यमानचरितं लोकंपृ[3]णं सांप्रतं पायं पायमयं तु कौक्कु[4]-टिकहार्दानन्दविन्दं दधे । स्वान्तं कान्तपदे[5]ऽद्वितीयपरविद्या-चुञ्चु[6]रास्मिस्ततः कारुण्यामृतपूर्णदृग्भव [illegible] भवज्वालाजलाधा-रक! ॥ ७ स्वाराम[7]ात्मदरीसुखासिक हरे मारागमाराममूदे-वेश द्यु[8]मणिप्रविष्ट येस[9] मे नीरोग[10]भावाप्तये । वृत्तिं मेऽज वि-रच्य हैमं[11] नसुधा[12]कारांशुकल्पां प्रभो त्वां[13]ऽहं शतशः परीत्य पदयोर्नम्रीभवाम्यच्युत ॥ ८ हे देवेज्य मज्जत्प्रसद्य[14] उपा-स्ति मेऽज भो ईयुषो नित्यादीनै[15]र्वैभञ्जनोत्सुकतया देव प्रसन्नो

१. 'ब्रह्माणीवचनं वाचा' इति शब्दार्णवः. २. 'पद्ये यशसि च श्लोकः'. ३. पृण—तर्पणे. ४. कौक्कुटिको=भिक्षुः. ५. क-स्य ब्रह्मणोऽन्तो यस्मात्स तथोक्तः. विष्णुपदे. ६. 'तेन वित्तश्चुं-चुप् चणपौ' इति चुंचुप्. 'चुंच्वजास्त्रिन्' पा०. ७. स्वात्मारा-मजनहृदयगुहावास. ८. सूर्यमण्डलान्तर्गत. ९. यसु—प्रयत्ने. १०. 'नीरोगता' पाठ. ११. हेमन्ते भवः, (अण्). १२. सु-धाकारा अंशवो यस्य, तथाविधाम्. १३. त्वाम्. १४. प्रसा[illegible]-य. 'प्रपूर्वकात्सदेः क्विप्. १५. 'दीष आदीनवः' इति कोशः ॥

CHATTAMPI SWAMI ARCHIVE

भत्र । शंभुग्ले[1]ऽयपदद्वयं निरुपमं [2]बन्धूकबन्धुं सदा धारावा-
हकवृत्तिमात्रविषयं कुर्वेऽनुगृह्णीष्व माम् ॥ ९ यत्पादाब्ज-
भवाभ्रगांगस[3]रिलं त्रै[4]यक्षकै[5]श्यं जवात्पूत्वे[6]हत्य[7]जनाघमर्षणविधौ
भागीरथी भासते । [8]कर्मन्दिप्रवरः [9]प्रेमय्य यमथो नेयात्सवि-
त्रीगुहां तं वन्देऽमृतसूसनाभिमधुरस्मेरास्यामिन्द्रानुजम् ॥ १०
जंभारिद्विपकुंभविभ्रमिरमोरोजोप[10]पीडं परीरंभारंभदशाप्ततत्कठि-
नतासाक्ष्यं भजे वैधवम । श्रीवत्सांगि[11]त[12]वत्समिंगितसुरागं
तुंगमांगल्यदं यत्तद्रूपितहृत्प्रत[12]र्य्यं निजसत्संस्थां विदन्मुच्यते ॥
११ ॥ [13]ईक्षुच्छायसहोदराच्युतकथावैतण्डिकायात्मभूभूतिर्मा-
[14]घवती वनी च नहि किंपा[15]कांघ्रिवद्रोचते । [16]यत्पतस्पृष्टविशा-

१, ग्लेवृ—सेवने. २. 'ज्ञातिसोदरबन्ध्वादिशब्दाः साधर्म्य-
वाचकाः' इत्याचार्यदण्डी. ३. 'सरिलं सलिलं जलं' इति वा
चस्पतिः. ४. त्रयी वेदः तत्समसंख्यकानीक्षणानि यस्य—त्री-
क्षण इति ध्येयं. ५. केशसमूह. ६. संशोध्य. ७. ८. अ-
व्ययात्त्यप्. मध्यलोकस्थजनानां—. ८. कर्मन्देन प्रोक्तमधीत
इति कर्मन्दी भिक्षुः. ९. प्राप्य. १०. (उरोजयोरुपपीड्य)
'सप्तम्यांचोपपीडरुधकर्षः' इति णमुत्. ११. अंग—चिह्नयुक्त-
करणे. १२. तय—गतौ. १३. इक्षूणां छाया—इक्षुच्छा-
य[illegible] 'छाया बाहुल्ये'. मेघच्छायेतिपाठः. १४. मघोन इ-
न्द्रस्येयं. १५. कारस्करमूलमिव १६. यत्पदस्पर्शबलात्.
'तस्पृष्ट' 'तत्स्पर्श' पा० ॥

CHATTAMPI SWAMI ARCHIVE

दभूदुर्पलिता स्त्री योषितैकोपला तं द्यों तत्सदिति त्रिभिः पर-
पदैर्वित्तं सदा भावये ॥ १२ दाक्षीसन्ततिवाक्षु माक्षिक-
झरासूर्ञ्छादगीर्ष्वक्षपद्वाणीष्वा ईं च वाऽस्ति वस्तुविदितोपा-
यस्त्वृते सद्दृशः । तत्पञ्चामृतदाष्टिनैष्ठिकमिमं त्वं धारया-
च्छिद्य मे गरूढार्शयमिन्दिराधवपदं विष्णो नमस्ये तव ॥ १३
त्वन्नाथान्तर ! बन्धुजीवसुमसार्माचिन्यमंगाधरीकर्तु नित्य तप-
स्यतीव कवितं यत्तेऽङ्घ्रिपङ्केरुहम् । सोयं त्वज्जनहृज्जनौशि-
कतमोहोघस्मरार्कोदये जल्पत्यच्युत यत्तदस्तु करुणा मल्कं सु-
खं रक्षितुम् ॥ १४ ये द्राक्षक्षवर्मृक्षितोक्तिपटवस्ते तेषु नि-
ष्ठा परा दृष्टाऽभीरकुलैधितात्र च बलाड्डोढौक्यमाना त्वया ।
कार्या कापि पतङ्गवंगियमिहृत्खेन्दो यया स्यात्कृती वक्ता चैव

१. पाषाणतामुपनीता. 'उपलः प्रस्तर'. २. 'जोषिता यो-
षितांगना'. इतिश—त. 'योषिदेकोपला' पा०:. ३. पाणिनिवच-
नेषु ( व्याकरणशास्त्रे ). ४. कणादवाक्येषु (वैशेषिकशास्त्रे).
५. गौतमीयेषु. (न्यायशास्त्रे). ६. आ—हेतिखेदे. ७.
सद्वस्तूपगमोपायः. विदितं वेदनं( भावेक्तः). ८. आशयं=वा-
सनां. ९. 'सन्नाथान्तर!' पा०. 'साधूनां हृदयंत्वहं' इति
व्यासोक्तेः. १०. ममेदंकन्. 'नैतन्मतं मल्कं' इतिभट्टी. 'नि-
त्यं' पा०. ११. मृक्ष—संघाते. १२. भृशं वर्द्धमाना. ढौ-
कृ—गतौ. १३. सूर्यमण्डलगामियोगिहृदयाकाशचन्द्र!. पगि—
गतौ. 'पतंगः पक्षिसूर्ययोः'॥

CHATTAMPI SWAMI ARCHIVE

दयापयो[1]जलनिधे विश्वंभराधोक्षज ॥ १५ अन्तःशीतलतां
हरे निरुपमां वावश्यमानोस्मि यद्भास्वन्मण्डलम[3]ण्डलेपु किरणै-
र्मूषत्पदं नौमि ते । हेत्स्तौमित्यघुरं धरास्य सुधितामोदोद !
तन्नापरं त्वत्तो वेद्मि मदीप्सितार्थघटने शोकापनोदात्मक ॥ १६
यत्प्रीत्यैन्दवरोचिषा त्रिजगती श्ये[6]तायते यत्पदं बुभ्वाऽवेत्स्पैरतां
चिरंतनमुनिदेश्यः सर्व एकं तु तम् । भक्तानुग्रहबद्धदीक्षमि-
तिवाग्दूरं त्वदूरं सतां सेर्पाधीश्वरदोषमुज्झिततमोदोषं मुकुन्दं भ-
जे ॥ १७ फर्तुं यत्पदसात्स्वकान्तरखगं शे[11]श्वीय मानेष्टिम-
त्स्वान्तोहं भगवत्कटाक्षमतुलं जालं [12]वृणे सांप्रतम् । दित्स-
न्प्राप्य्य[13] तमेनमस्य सुखने पीयूषधारो भव त्वं मद्रार्द्रसुदृग्घटा-
च्युत हरे दैनंदिनेष्टिं दधे ॥ १८ हे देवेश नैखं[15]पचोष्मलदरा-

१. पयःपयोनिधे ! . २. भृशमिच्छन् . वश—कान्तौ . का-
न्तिरिच्छा . 'यङि न वशः' इति न संप्रसारणं . ३. 'मण्डलस्थ-
किरणात्' पा० : . ४. मूष—लुण्ठने . ५. नैश्चल्य . ६. श्ये-
नीवाचरति . ७. षी—गतौ . ८. पुरातन— . ९. वासुकि-
सम्मितभुजं . 'पुंसोंगैरुपमानानां...बाह्वोरहीश्वरः' इतिकविकल्प-
लता . १०. 'तदर्धानवचने' इति सातिः . ११. (भृशंवर्द्धमा-
नाभिलाषवत्) . टुओश्वि—गतिवृध्योः . 'विभाषाश्वेः' : . १२
वृ—वरणे . १३. प्रापय्य . 'विभाषापः' इति णेरयादेशविक-
ल्पः . १४. मांगल्यरसार्द्रदर्शनसमूह ! . १५. 'मितनखेच' इ-
ति खश् . नखान्पचतीति तथा . (पचिरत्रतापवाची )' ॥

CHATTAMPI SWAMI ARCHIVE

[1]बाधाऽतिदावानला यन्मां त्वत्पदपंकजोदरमरन्देन्दि[2]न्दिरं बाध-
ते । तद्विष्णो भगवन् क्रि[3]यासमभिहाराभ्यस्तसंविचिमद्धृ-
न्नार्डिधम ! माऽव बन्धुपदवीं सन्धाय कारुण्यतः ॥ १९
चिन्मात्रात्मक कू[4]लमुद्रुजकूप ! त्वामन्वहं निर्भिदम् [5]विन्तेऽ-
द्वन्द्वदशाऽयमेतु सहजां[6] तचारयु[7]ग्लाक्षित । श्रीनाथस्य कटा-
क्षसन्ततिरमुष्मिन्नार्पपातं पतत्वश्रान्तं दिननाथसद्मग ! हरे
तुभ्यं नमस्तत्कृते ॥ २०  बालसमाह्वमुनिप्रवराणामन्तसदा-
सितकण्ठकृतं यः । श्रीहरिभक्तिमरन्दमिमं संसेवत एष
सुखीह सदा स्यात् ॥ २१ ॥  शान्तिः ॥

इति श्रीहरिभक्तिमरन्दः

समाप्तः ॥

---

१. भयपीडा. 'तराबाधे' तिपाठः. २. भ्रमरं. ३. क्रियासमभिहारेण पौनः पुन्येन (अभ्यस्त) परिशीलित (संवित्तिमतां) ज्ञानवतां हृदयनाडि (संश्रयणेन) पूरयितुं शीलं यस्य तत्संबुद्धिः. ४. कूलङ्कषकूप !. ५. विदविचारणे. रुधा—. ६. सहजाख्यां (समाध्याख्यां) अवस्थां 'समतां' पा. ७. तार (क) योगगम्य !. ८. अपां समूह आप :. (आपवत्पततु). ९. अन्ते वासी—(सप्तम्या लुक्) ॥

CHATTAMPI SWAMI ARCHIVE

अथ आत्मादर्शप्रारंभः ॥

---

ॐ ॥ यद्दृङ्मकरन्दकणाः स्वाराज्यश्र्येकसंविधा-
नचणाः । [1]अनिशं श्रीगुरुचरणाः सन्तु त इह शान्तये कृ-
[2]पैभरणाः ॥ १ आमुक्तेस्संसारः [3]शृंखलितः स्वाप्नवि[illegible]मा-
कारः । स्व[illegible]णनिपुणैः शीर्षच्छेद्योऽस्त्ययं सुखार्थि-
[4]पुंमन् ॥ २ सुप्तेऽ[5]हमिं तद्भावान्नैवात्मन एष किंतु तस्य
स्यात् । अपि च यथाऽयसि दाहकताऽग्निगताऽऽत्मनि त-
द्ग्रहात्स तथा ॥ ३ [6]एके तत्पदवेदे गतार्थमिह मन्वते
निरोधादिम् । यद्यपि तथाऽपि तन्न श्रुतौ निदिध्यासितव्य
इत्युक्तेः ॥ ४ अन्यत्वारूढोपि हि निपात्यतेऽधः प्रसाक्तित-
स्त्विति च । तत्स्वानुभूतिपूर्[7]वकानिरोधलाभेऽर्थसिद्धिरनुपह-
ता ॥ ५ विद्यारण्यैर्वार्तिकसारेऽप्ययमेव वर्णितोऽर्थोऽस्ति ।
वि[illegible]यर्हो न बुधश्चेत्क्लिश्यन्विधिमर्हतीत्यबुद्ध इव ॥ ६ ये-
षामनुभवदार्ढ्याल्क[illegible]चित्कं प्रपञ्चभानामिह । तानुद्दिश्य वि-
धिर्न प्रसरति वाऽन्यान्कटाक्षयति ॥ ७ अत्राहं ब्रह्मैवेत्य-

---

१. 'अभ्याहृत्वश्रीचरणाः. पा०. २. 'पुरणाः' पा०. ३. 'संवलितः. ४. 'जन'. ५. अहंकारे ([illegible]नष्टेसति). ६. 'केचित्तत्पदबोधे'. ७. 'सहकृत'. ८. 'रतिरुचिरा'॥

CHATTAMPI SWAMI ARCHIVE

न्यानन्तारिताचिन्तनं जयति । सैषाऽहमिति धियाऽऽधारसंवि-
दि स्वान्तसन्निरोधो वा ॥ ८ भ्रूमध्यज्योतिःसंघठितार्धोन्मी-
लिताक्षियुगळैषा । शाम्भव्यतिरमणीया मुद्रेह तया धियो
निरुद्धाः स्युः ॥ ९ चित्तलयोपक्रममिह सुखमतिशयितं
भवेत्सदाऽस्माकम् । निद्रारंभक्षण इव वृत्तेरन्तर्मुखीभावात् ॥
१०[1] ॥ सद् भाति प्रियमेवं क्रमेण दृष्टा त्रिधा चिदनुभूतिः ।
स्यादादौ शास्त्रादथ गुरुतः पुनरात्मतश्च "लोक इव ॥ ११
दशमोस्त्ययमहमित्यादिषु" मधुवाग्दर्शनानुभववद्वा । हेतु[3]-
बहुत्वेऽपि गुरोः स्यादाधिक्यं गुरूपसत्युक्तेः ॥ १२ शान्तो
दान्त इति श्रुतिबलतः पश्येच्छमादिसम्पन्नः । आत्मन्यात्मा-
नं युष्मदर्थसंत्यागतोऽथ कोऽहमिति ॥ १३ आलोचनाकुल-
स्य त्वं तदसीत्यज्ञतानिरसनाय । श्रुतिराह मातृकल्पाऽधिका-
रिणं स च पुमान्यदैवेत्थम् ॥ १४ प्रध्वस्ताहंमम इह त-
दाऽवगच्छति हि तत्वमस्यादेः । अहमस्मि परं ब्रह्मेत्यथैष
वागार्थ[4]ताविषयः स्यात् ॥ १५ स्थूलारुन्धतिकाख्यन्या-

१. वृत्तयः. क्रि०त्रि०. 'चेतः क्षयकालावधि' पा०. (तदा-स्म्योति भायः). २. 'नृणाम्' पा०. ३. (उपपूर्वकात्सदेः क्विन्) 'तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्' श्रुतिः. 'गुरुर्मुख्यो बोधे' पा०. ४. 'गोचरो भवति' पा०. ५. अरुन्धतीप्रदर्शनन्यायेन ॥

CHATTAMPI SWAMI ARCHIVE

यादुपलक्ष्यते परोप्यात्मा । [1]दण्डापूपिकया वा क्वचिदशरी-
रश्रुतीरितपथाऽयम् ॥ १६ अखिलानात्मनिवृत्तौ कश्च-
न निर्वृतिमियाद्यथेह विराट् । कस्मान्नु बिभेमीति श्रुतौ
तथा दर्शनादितोऽप्यपरः ॥ १७ वरुणाच्छ्रुतवाक्यानु-
स्मृत्या [2]भृगुरिव मुनिर्यतो वेति । गुरुणा वाक्यं संस्मा-
र्यमाण आरुणिकुमार इव चान्यः ॥ १८ अपरो वाक्य-
श्रुतितः पिशाचकाख्यवदवाप्नुयात्त्रिषु च । सिद्धिर्गुणौ[3]-
क्षरीया विनिश्चिता स्मार्यमाणे तु ॥ १९ नित्याप्तमपि ब्र-
ह्माऽस्मतया प्रतिबद्धधद्दङ्न वेत्तीह । श्रृङ्ग[4]ग्राहिकयेव प्रकाशितं
भर्त्तुदर्शनन्यायात् ॥ २० सत्यज्ञानसुखात्मा जीवो ब्रह्मेति
तत्वमस्यादेः । श्रुत्यागमावितपक्षः श्रुतिं विनाऽप्येष रक्ष्यते नि-
पुणम् ॥ २१ विद्वर्तिसहैर्जाग्रत्प्रतिभासाद्द्वैतसिद्धिरिति
चेन्न । अन्यत्रानवभासादित्याद्यैरेवं[5] तीक्ष्णयुक्तिनखैः ॥ २२
अर्थेषु जाग्रदादिष्वत्र व्यावर्तमानेषु । अहमर्थस्य निरन्तर-
चैतन्यस्यैकरूपतया ॥ २३ अनुवृत्तेरव्यभिचारित्वात्सद्रूप-
ताऽथसाक्ष्याणाम् । व्यभिचारिणां स्वरूपाननुप्रवेशेन चे-

१. एकदण्डलग्नापूपग्रहणन्यायेन. २. ‘ भार्गवमुनिः’ पा०’
३. यादृच्छिकी. ४. श्रृङ्गस्य ग्रहणं यस्यां सा. यथैकः श्रृङ्गं
गृहीत्वा स्वकीयां गां प्रदर्शयेदेवम्. ५ .‘ रूढयुक्तिनखैः.
पा० ॥

CHATTAMPI SWAMI ARCHIVE

क्षितृत्वात्तु ॥ २४ अव्यभिचारितैषा दीपस्येवेह घट-
पटादिषु च । अन्योन्यव्यभिचारिष्वेवं सद्ब्रह्मताऽनपोह्या-
स्ति ॥ २५ नेत्रादिसम्प्रयोगाद्वृत्त्या बाह्यो घटादिरत्र
यदा । संव्याप्यते तदा ज्ञानान्वयविषयकितं तु साक्ष्यात्मा
॥ २६ सर्वं वस्तु ज्ञातत्वेन स्फोरयति तत्र समये तु ।
अज्ञातं क्रोडीकृत्याज्ञातत्वेन च प्रकाशयति ॥ २७ सं-
सारिजीवसन्निधिमात्रादुपचर्यते हि कूटस्थे । छत्रिन्याया-
त्साक्षिणि पानाकर्षादि शोधितात्मनि नः ॥ २८ व्यापित्वा-
न्नित्यत्वात्सार्वात्म्याद्देशकालवस्तुकृतैः । नावच्छेदैर्युक्तोऽस्म्य-
खण्डसुखरूप एव तेनाहम् ॥ २९ नैव सुखं धर्मो धर्म-
धर्मिणोर्भेदसव्यपेक्षत्वात् । भेदस्य श्रुत्यन्तैर्मृत्योरित्यादिभिर्नि-
षेधाच्च ॥ ३० रविरिव बाह्यैश्चाक्षुषदोषैरस्पृष्ट एष साक्ष्या-
त्मा । चेतयोपरागरूपं साक्षित्वं मे नतात्विकं ह्यपितु ३१ उ-
पलक्षणार्थकं ब्रह्मणो जगत्कारणत्वबोधनवत् । अत्र तटस्थोक्ति-
र्नोसामञ्जस्यं व्रजे" दवचनेन ॥ ३२ ब्रह्मप्रोवाचे "ति श्रुत्य-
र्थालोचने ततो मौनम् । युक्ततमं वाग्विवृत्तौ द्वैताद् ब्रह्मास्मि-
तत्सदों शान्तम्॥६३ अभीह्वश्रीभगवच्छिष्याप्रियनीलकण्ठती
र्थकृते। आत्मादर्श इहास्तु स्वरूपसन्दर्शनं सहृदयानाम् ॥३४

इति स्वाराज्यसर्वस्वे आत्मादर्शः ॥

१. 'परिस्पन्दाद्'. २. वृत्तिपरम्परा— . ३. यथा क्ष
त्रिणो गच्छन्तीत्यादौ छत्रयच्छात्रसमुदाये छत्रिशब्दे वर्त्तते
एवम्. ४. औचित्यम् ॥

CHATTAMPI SWAMI ARCHIVE

## अथ आत्मपञ्चकम् ॥

हरिः । मृत्युं जिहासति परं शशवद्विमूढो नेत्रे निमी-
ल्य निभृतं नहि शांभवीयं । नास्वादयत्यमृतमान्तरदोःपुटे
हा संसारकूप इव दर्दुरभावमाप्तः ॥ १ मृत्युं जिहासति परं
शशवद्विमूढस्तत्त्वंपदार्थमहामित्यातिमृत्युरूपम । नो वेत्ति ह-
न्त महिताद्गुरुवक्त्रपद्मात् दुर्वारमोहरशनाभिरिहावबद्धः ॥ २
मृत्युं जिहासति परं शशवद्विमूढो ह्यस्मादुपैतुमिह वाञ्छति ना-
त्मसौधम् । अज्ञानमूलगतितः कुपथं प्रविष्टो दैवस्य चैष
हतकस्य नु दुर्विलासः ॥ ३ मृत्युं जिहासति परं शशवद्विमू-
ढो नाद्वैतविल्पदरजांस्यनवाप्य भूमौ । हा का गतिर्हि विप-
रीतदुरूढमत्यां सत्यां जनस्य परबोधविरोधवत्याम् ॥ मृत्युं
जिहासति षरं शशवद्विमूढः श्रौत्या दृशेदमखिलं नमृषेति वि-
द्वान् । हा हन्त खिन्दति भवाब्धिगतो दुरात्मा मायाविला-
समिममात्मनि पश्य चित्रम् ॥ ५ ओं ॥ श्रीनीलकण्ठती-
र्थस्वामिकृपाप्रसाद्वयात्मानिष्ठैषा । कृत्वेदमात्मयोगिन्यर्पितव-
त्यत्रभगवति कृपाब्धौ ॥ ६

इत्यात्मयोगिन्युक्तमात्मपञ्चकम् ॥

CHATTAMPI SWAMI ARCHIVE